# आदर्शप्रश्नपत्रम्
## संस्कृतम् (सम्प्रेषणात्मकम्) 122
## कक्षा - नवमी
## (सङ्कलनात्मकं मूल्याङ्कनम्)
## (प्रथमसत्रम्)

**समय : होरात्रयम्** **पूर्णाङ्काः 90**

**निर्देशाः**

(i) प्रश्नपत्रे चत्वारः खण्डाः सन्ति।

| | | | |
|---|---|---|---|
| **खण्डः (क)** | **अपठित-अवबोधनम्** | - | **10 अङ्काः** |
| **खण्डः (ख)** | **रचनात्मकं कार्यम्** | - | **15 अङ्काः** |
| **खण्डः (ग)** | **अनुप्रयुक्तव्याकरणम्** | - | **30 अङ्काः** |
| **खण्डः (घ)** | **पठित-अवबोधनम्** | - | **35 अङ्काः** |

(ii) सर्वे प्रश्नाः अनिवार्याः।

(iii) प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।

(iv) प्रश्नसंख्या अवश्यं लेखनीया।

(v) उत्तराणि संस्कृतेन एव लेखनीयानि।

### खण्डः- (क) अपठित-अवबोधनम् 10 अङ्काः

1. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन लिखत- 10

सुकरातः यूनानदेशस्य प्रसिद्धः दार्शनिकः आसीत्। एकदा तस्य समीपे एकः भक्तः आगच्छत् अपृच्छत् च ‘‘महात्मन्! दीपकस्य अधः अन्धकारः किमर्थम् भवति चन्द्रमसि च कलङ्कः किमर्थं भवति?’’ इति। सुकरातः प्रत्यवदत्– ‘‘वत्स! किं भवता दीपके प्रकाशः चन्द्रमसि च शीतलता न दृष्टा? केवलं तत्र अन्धकारः कलंकः एव दृष्टः। एषः मनोवृत्तिदोषः एव। यादृशी यस्य भावना भवति सः तद्वस्तु तद्भावेन एव पश्यति। अतः अस्माभिः सद्गुणाः एव द्रष्टव्याः न तु अवगुणाः इति।’’ अतएव उच्यते यदि नरः सकारात्मक-दृष्ट्या जीवनम् यापयति तदा तस्य सर्वे विकाराः दूरीभवन्ति। मानवस्य जीवने सुखदुःखयोः मूलकारणम् तस्य सकारात्मकः नकारात्मकः च दृष्टिकोणः एव।

प्रश्नाः -

I. एकपदेन उत्तरत :- ½×4=2

(i) मानवस्य जीवने सुखदु:खयो: मूलकारणम् किम्?

(ii) अस्माभि: चन्द्रमसि का द्रष्टव्या?

(iii) भक्त: कस्य समीपे आगच्छत्?

(iv) सुकरात: कस्य देशस्य दार्शनिक: आसीत्?

II. पूर्णवाक्येन उत्तरत :- 1×2=2

(i) भक्त: सुकरातम् किम् अपृच्छत्?

(ii) मनुष्यस्य सर्वे विकारा: कथं दूरीभवन्ति?

III. अस्य अनुच्छेदस्य कृते उचितम् शीर्षकम् लिखत। 2

IV. प्रदत्तविकल्पेभ्य: शुद्धम् उत्तरम् चित्वा लिखत- 1×4=4

(i) 'अपृच्छत्' इति क्रियापदस्य कर्तृपदम् किम्?

(अ) सुकरात: (ब) भक्त:

(स) दार्शनिक: (द) एक:

(ii) 'उपरि' इत्यस्य किं विलोमपदम् अनुच्छेदे प्रयुक्तम्?

(अ) अध: (ब) अद्य

(स) नीचै: (द) समीपे

(iii) ''किमर्थम् भवता दीपकस्य प्रकाश..........'' इति वाक्ये 'भवता' इति सर्वनामपदं कस्मै प्रयुक्तम्?

(अ) सुकराताय (ब) दीपकाय

(स) चन्द्राय (द) भक्ताय

(iv) यादृशी इति पदस्य किम् विशेष्यपदम् अनुच्छेदे प्रयुक्तम्?

(अ) मनोवृत्ति: (ब) भावना

(स) वस्तु (द) भावना:

## खण्ड:– 'ख' (रचनात्मकं कार्यम्) 15 अङ्का:

2. भवान् अनिल:। भवतां विद्यालये संस्कृतभित्तिपत्रिकाप्रतियोगिताया: प्रदर्शिनी आयोजिता। तद्विषये स्वमित्रं सौरभं प्रति सूचयता भवता लिखिते अधोलिखिते पत्रे मञ्जूषात रिक्तस्थानानि पूरयित्वा पत्रं पुन: उत्तरपुस्तिकायां लिखत। ½×10=5

पतञ्जलिछात्रावास:

(i) ..........................

तिथि: ..........................

प्रिय मित्र (ii) ........................!

अत्र सर्वगतं कुशलम् अस्ति। भवतः विद्यालये आयोजितायाः (iii) ........................ विषये पठित्वा मम मनसि महान् आनन्दः जातः। अस्मिन् सत्रे अत्र रचनात्मककार्यस्य अन्तर्गते (iv) ........... ............ प्रदर्शिनी आयोजयिष्यते। सर्वाभिः कक्षाभिः स्वस्वकक्षेषु संस्कृतभित्तिपत्रिकाणां (v) .......... .............. भविष्यति। तस्याः कृते पत्रिकायाः (vi) ........................ पञ्जीकरणम् अपि आवश्यकम् आसीत्। छात्राः एव तत्र सम्पादकाः भविष्यन्ति। अस्माकं (vii) ........................ नाम संस्कृतपीयूषम् इति अस्ति। अहमेव अस्याः सम्पादकः नियुक्तः। संस्कृतदिवसस्य अवसरे अस्याः उद्घाटनं भविष्यति। भवान् अपि (viii) ........................ अस्माकं कार्यं च पश्यतु।
शेषं पुनः निवेदयिष्यामि।
स्वपित्रोः सेवायाम् मम (ix) ........................ निवेदयतु।

भवताम् अभिन्नं मित्रम्
(x) ........................

| |
|---|
| संस्कृतभित्तिपत्रिकायाः, चित्रवर्णनप्रतियोगितायाः, हरिद्वारतः, प्रदर्शनं, नाम्नः सौरभ, अनिलः, पत्रिकायाः, आगच्छतु, अभिवादनम् |

3. मञ्जूषायां प्रदत्तशब्दानां सहायतया चित्रं दृष्ट्वा पञ्चवाक्यानि संस्कृतेन लिखत।
2×5=10



मञ्जूषा

| |
|---|
| बसयानम्, कारयानानि, स्कूटरयानेन, मेट्रोयानम्, स्तम्भाः, जनाः, वाहनानि, वृक्षाः उपरि, अधः पृष्ठे, सन्ति, चलति, गच्छन्ति, मार्गः सेतोः तीव्रगत्या, शीघ्रम्, विद्युत्स्तम्भाः |

**अथवा**

''मञ्जूषायां प्रदत्तशब्दानाम् सहायतया ''जलप्रदूषणम्'' इति विषयम् अधिकृत्य पञ्चवाक्यानि संस्कृतेन लिखत। 2×5=10

**मञ्जूषा**

| |
|---|
| अवकरं, नदीषु, जनाः, कार्यशालाभ्यः दूषितम्, मलम्, क्षिपन्ति, स्वच्छम्, क्षालयन्ति, वस्त्राणि, पूजा-सामग्री, पुष्पाणि, नालिकामार्गेण, जायन्ते, रोगाः, भवन्ति, रुग्णाः, पीत्वा, |

**खण्डः– 'ग' (अनुप्रयुक्तव्याकरणम्) 30 अङ्काः**

4. (i) अयं वर्णः तवर्गे नास्ति– 1×4=4

(अ) थ् (ब) द्

(स) ध (द) घ

(ii) अस्य उच्चारणस्थानम् तालु नास्ति–

(अ) इ (ब) य्

(स) च् (द) त्

(iii) उचितम् वर्णम् चित्वा वर्णवियोजने रिक्तस्थानपूर्तिं कुरुत–

वृक्षस्थः- व् ऋ क् .................... अ स् थ् अः

(अ) श् (ब) ष्

(स) क्ष् (द) स्

(iv) उचितम् वर्णसंयोजनम् चिनुत–

व् इ द् य् आ ल् अ य् अः

(अ) विधालयः (ब) विद्यालयः

(स) विद्यालय (द) विध्यालय

5. अधोलिखितवाक्येषु रेखाङ्कितपदानां समुचितं सन्धिं विच्छेदं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत– ½×10=5

(i) शिष्यः <u>अध्ययन + अर्थम्</u> गुरुम् प्रति गच्छति।

(अ) अध्ययनर्थम् (ब) अध्ययनर्थम

(स) अध्ययनार्थम् (द) अध्ययनरथम्

(ii) नरः <u>पञ्च + इन्द्रियाणि</u> वशं कुर्यात्।

(अ) पञ्चेन्द्रियाणि (ब) पञ्चेन्द्रीयाणि

(स) पञ्चैन्द्रियाणि (द) पञ्चान्द्रियाणि

(iii) पुत्रम् दृष्ट्वा माता <u>उत् + लसिता</u> जाता।

(अ) उत्लसिता (ब) उन्लसिता

(स) उल्लसिता (द) उद्लसिता

(iv) संगीतरहितम् जीवनम् <u>नीरसम्</u> प्रतीयते।

(अ) नी + रसम् (ब) नि + रसम्

(स) निर + रसम् (द) निर् + रसम्

(v) <u>प्रत्येकम्</u> कार्यम् विचार्य एव कर्त्तव्यम्।

(अ) प्रति + ऐकम् (ब) प्रति + एकम्

(स) प्रती + एकम् (द) प्रतिः + एकम्

(vi) हास्यं जीवने <u>महौषधिः</u> इव भवति।

(अ) महा + ओषधिः (ब) मह + औषधिः

(स) मह् + औषधि (द) महत + ओषधिः

(vii) <u>वाक्</u> + ईशः परिश्रमेण कार्यम् करोति।

(अ) वाकीशः (ब) वादीशः

(स) वागीशः (द) वागिशः

(viii) <u>एतच्चित्रम्</u> कक्षे शोभते।

(अ) एतत् + चित्रम् (ब) एतच्+ चित्रम्

(स) एतत + चित्रम् (द) एतम् + चित्रम्

(ix) तावद् भविष्यामि <u>अनयोः</u> + <u>विधेयः</u>।

(अ) अनयोर्विधेयः (ब) अनयोर्वीधेयः

(स) अनर्योविधेयः (द) अनयोविधेयः

(x) भरतः अवदत्– ''अनुगृहीतोऽस्मि''।

(अ) अनुगृहीत + अस्मि (ब) अनुगृहीतः + अस्मि

(स) अनुगृहीतो + स्मि (द) अनुगृहीता + अस्मि।

6. उचितशब्दरूपाणि चित्वा रिक्तस्थानानि पूरयत– ½×10=5

(i) एषः .............................. वसिष्ठस्य आश्रमः अस्ति।

(अ) मुनिः (ब) मुनयः

(स) मुने (द) मुनेः

(ii) आश्रमे ................................ हिंसा निषिद्धा।

(अ) पशूनामः (ब) पशुनाम्

(स) पशूनाम् (द) पशूनाम

(iii) शीला ................................ लेखम् लिखति।

(अ) पत्रिकां (ब) पत्रिकया

(स) पत्रिकायाम् (द) पत्रिका

(iv) उद्याने सुन्दराणि ............................... सन्ति।

(अ) पुष्पानि (ब) पुष्पाणी

(स) पुष्पैः (द) पुष्पाणि

(v) ........................... बालिकायाः माता शिक्षिका अस्ति।

(अ) अस्य (ब) अस्याः

(स) अस्यः (द) अस्या

(vi) रामायणस्य ................................ नाम महर्षिः वाल्मीकिः।

(अ) रचयिता (ब) रचयित्रा

(स) रचयितुः (द) रचयितु

(vii) विवेकः नवतिः ................................... प्राप्य उत्तीर्णः जातः।

(अ) अङ्कान् (ब) अङ्कान

(स) अङ्कैः (द) अङ्कानि

(viii) विद्वांसः .................................... वन्दनाम् कुर्वन्ति।

(अ) सरस्वती (ब) सरस्वतीम्

(स) सरस्वत्याः (द) सरस्वत्या

(ix) तव गृहे बहूनि ................................ सन्ति।

(अ) वस्तुनी (ब) वस्तुनि

(स) वस्तु (द) वस्तूनि

(x) महोदय! ............................... प्रार्थनापत्रम् स्वीकरोतु।

(अ) अहम् (ब) मम्

(स) मम (द) माम्

7. उचितधातुरूपाणि चित्वा रिक्त-स्थानानि पूरयत- ½×10=5

(i) अस्माकम् कक्षायाम् त्रिंशत् छात्राः ........................।

(अ) अस्ति (ब) सन्ति

(स) सन्तिः (द) सन्ती

(ii) ह्यः वयम् 'अभिज्ञानशाकुन्तलम्' इति नाटकम् ...........................।

(अ) अपठम् (ब) अपठाम

(स) अपठाम् (द) पठामः

(iii) ग्रीष्मावकाशे मम पिता अस्मान् हिमाचल-प्रदेशे .......................।

(अ) नेष्यामि (ब) नेष्यन्ति

(स) नेष्यति (द) नेष्यसि

(iv) ये जनाः वृद्धान् सेविष्यन्ते, ते एव भविष्ये यशः .........................।

(अ) लभते (ब) लभन्ते

(स) अलभन्त (द) लप्स्यन्ते

(v) हे भिक्षुक! त्वम् किमर्थम् ..........................? किमपि कार्यं कुरु।

(अ) याचते (ब) याचे

(स) याचसे (द) याचै

(vi) ह्यः चलचित्रम् दृष्ट्वा बालाः ...........................।

(अ) अमोदत (ब) अमोदन्त

(स) अमोदध्वम् (द) अमोदामहे

(vii) अहम् स्वमातरम् .................................।

(अ) सेविष्ये (ब) सेविष्यते

(स) सेविष्यसे (द) सेविष्यामहे

(viii) गतसप्ताहे त्वम् स्वाध्यायं न .........................।

(अ) अकरोत् (ब) करिष्यसि

(स) अकरोः (द) करोषि

(ix) सर्वे छात्राः प्रातः विद्यालयम् गत्वा स्वगुरुम् ...........................।

(अ) नंस्यति (ब) नंस्यथ

(स) नंस्यामः (द) नंस्यन्ति

(x) भो बालिकाः! यूयम् पाकशालायाम् ओदनम् ...............................।

(अ) पचन्ति (ब) पचथ

(स) पचथः (द) पचामः

8. मञ्जूषातः उचितानि पदानि चित्वा अधोलिखिते अनुच्छेदे रिक्तस्थानानि पूरयित्वा अनुच्छेदं पुनः लिखत– 1×5=5

एकः बालकः उद्याने (i) …………………… अधः क्रीडति स्म। सहसा प्रचण्डः वायुः अचलत्। (ii) …………………… परितः वायुमण्डलं धूलिधूसरितम् अभवत्। दीर्घाः शाखाः (iii) …………………… उपरि अपतन्। बालकः उच्चैः व्यलपत्। (iv) …………………… कुशलः एकः स्वयंसेवकः तत्र आगत्य बालकम् अरक्षत्। एतस्मै परोपकारिणे स्वयंसेवकाय (v) ………….. ।

**मञ्जूषाः–**

| |
|---|
| उद्यानम्, नमः, वृक्षाणाम्, रक्षाकार्ये, बालकस्य |

9. (क) अधोलिखितवाक्येषु कोष्ठके प्रदत्तौ प्रकृतिप्रत्ययौ संयोज्य रिक्तस्थानपूर्तिं कृत्वा वाक्यानि पुनः लिखत– 1×3=3

(i) वानरः वृक्षम् ……………………… कूर्दते। (आ + रुह् + ल्यप्)

(ii) भोजनम् ……………………… जनाः भ्रमन्ति। (खाद् + क्त्वा)

(iii) सायंकाले बालाः ……………………… उद्याने गच्छन्ति। (क्रीड् + तुमुन्)

(ख) अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृतिप्रत्ययौ पृथक्कृत्य लिखत। 1×3=3

(i) रमेशः प्रतिदिनम् अम्बाम् <u>प्रणम्य</u> विद्यालयम् गच्छति। (प्र ………………….)

(ii) बालकः दुग्धम् <u>पीत्वा</u> स्वपिति। (…………………. क्त्वा)

(iii) भक्ताः रामकथाम् <u>श्रोतुम्</u> देवालयम् गच्छन्ति। (…………………. तुमुन्)

## खण्डः– 'घ' (पठित-अवबोधनम्) 35 अङ्काः

10. अधोलिखितं गद्यांशं पद्यांशं नाट्यांशं च पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत।

(अ) गद्यांशः

महर्षेः आरुणेः पुत्रः श्वेतकेतुः आसीत्। द्वादशवर्षीयं तं पुत्रं पिता आरुणिः उवाच– हे श्वेतकेतो! गुरुं प्रति गच्छ अध्ययनार्थं यतः सौम्य! अस्मत्कुलीनः अनधीत्य न भवति इति। सः पुत्रः आचार्यम् उपेत्य यावत् चतुर्विंशतिवर्षः अभवत् तावत् सः सर्वान् वेदान् सार्थान् अधीत्य पितुः सकाशम् आगच्छत्। सः च 'सर्वश्रेष्ठः अहम्' इति मन्यमानः उद्धतस्वभावः अभवत्।

प्रश्नाः–

I. एकपदेन उत्तरत। ½×2=1

(i) श्वेतकेतुः आचार्यम् उपेत्य किम् अधीतवान्?

(ii) अध्ययनं कृत्वा कः उद्धतस्वभावः अभवत्?

II. पूर्णवाक्येन उत्तरत 2×1=2

(i) श्वेतकेतुः कतिवर्षीयः भूत्वा पितुः सकाशम् आगच्छत्?

III. उचितम् उत्तरम् चित्वा लिखत- 2

(i) 'अधीत्य' इति पदस्य किम् विलोमपदम् गद्यांशे प्रयुक्तम्?

(अ) सार्थान् (ब) अनधीत्य

(स) उपेत्य (द) उद्धतः

(ii) सार्थान् इति पदस्य अनुच्छेदे विशेष्यपदम् किम्?

(अ) ग्रन्थान् (ब) आचार्यान्

(स) सर्वान् (द) वेदान्

(आ) पद्यांशः-

**काष्ठादग्निर्जायते मथ्यमानाद्**
**भूमिस्तोयं खन्यमाना ददाति।**
**सोत्साहानां नास्त्यसाध्यं नराणां**
**मार्गारब्धाः सर्वयत्नाः फलन्ति।।**

प्रश्नाः-

I. एकपदेन उत्तरत। ½×2=1

(i) कीदृशां नराणां कृते किमपि असाध्यं नास्ति?

(ii) कीदृशाः यत्नाः फलन्ति।

II. पूर्णवाक्येन उत्तरत। 2×1=2

अग्निः कीदृशात् काष्ठात् जायते?

III. उचितम् उत्तरम् चित्वा लिखत- 1×2=2

(i) 'फलन्ति' इति क्रियापदस्य कर्तृपदम् किम्?

(अ) अग्निः (ब) भूमिः

(स) मार्गारब्धाः (द) सर्वयत्नाः

(ii) 'जलम्' इति पदस्य पर्यायपदम् पद्यांशे किम् अस्ति?

(अ) तोयम् (ब) वारि

(स) अम्बुदम् (द) सलिलम्

(इ) नाट्यांश:-

**राम:**– मे शापितो न परिरक्षसि चेत् स्वराज्यम्।

**भरत:**– हन्त! अनुत्तरम् अभिहितम्। भवतु, समयत: ते राज्यं परिपालयामि।

**राम:**– वत्स! क: समय:?

**भरत:**– मम हस्ते निक्षिप्तं तव राज्यं चतुर्दशवर्षान्ते प्रतिग्रहीतुम् इच्छामि।

**राम:**– एवमस्तु।

**भरत:**– आर्य! अन्यमपि वरं हर्तुम् इच्छामि।

**राम:**– वत्स! किमिच्छसि? किमहं ददामि?

**भरत:**– पादोपभुक्ते तव पादुके मे एते प्रयच्छ।

प्रश्ना:-

I. एकपदेन उत्तरत। ½×2=1

(i) क: अन्यम् अपि वरं हर्तुम् इच्छति?

(ii) राम: भरतं किम् परिरक्षितुम् कथयति?

II. पूर्णवाक्येन उत्तरत। 1×2=2

(i) भरत: रामं किं दातुं प्रार्थितवान्।

III. उचितम् उत्तरम् चित्वा लिखत– 2

(i) ‘ग्रहीतुम् इति पदस्य किम् विलोमपदम् अत्र अस्ति?

(अ) निक्षिप्तम् (ब) अभिहितम्

(स) प्रतिग्रहीतुम् (द) हर्तुम्

(ii) अस्मिन् नाट्यांशे ‘वत्स!’ इति सम्बोधनपदम् कस्मै प्रयुक्तम्?

(अ) सीतायै (ब) भरताय

(स) रामाय (द) सुमन्त्राय

11. अधोलिखितश्लोकयो: भावार्थं मञ्जूषात: उचितपदानि चित्वा पूरयत। ½×8=4

(क) स जातो येन जातेन याति वंश: समुन्नतिम्।
परिवर्तिनि संसारे मृत: को वा न जायते।।

**भावार्थः**- अयम् संसारः (i) ................................ अस्ति। अत्र प्रतिदिनम् अनेके जनाः जायन्ते (ii) ................................ च, परम् यस्य नरस्य (iii) ................................ वंशस्य गौरवं वर्धते, तस्य जन्म एव (iv) ................................ भवति।

(ख) वरमेको गुणी पुत्रो न च मूर्खशतान्यति।
एकश्चन्द्रस्तमो हन्ति न च तारागणैरपि।।

**भावार्थः**- गुणवान् पुत्रः एकः एव सर्वेषु पुत्रेषु (v) ................................ भवति शतानि अपि (vi) ................................ पुत्राः न। यथा एकः एव चन्द्रमा (vii) .............................. नाशयति न तु। (viii) ................................ तारकाणाम् समूहः।

**मञ्जूषा**

| |
|---|
| अन्धकारम्, परिवर्तनशीलः, मूर्खाः, जन्मना, सार्थकम्, श्रेष्ठः, म्रियन्ते, अनेकेषाम् |

12. (क) निम्नलिखित श्लोकयोः अन्वयं मञ्जूषातः समुचितं पदं चित्वा पूरयत। ½×8=4

सुचिरेणापि कालेन यशः किञ्चिन्मयार्जितम्।
अचिरेणैव कालेन भरतेनाद्य सञ्चितम्।।

**अन्वयः**- मया (i) ................................ कालेन अपि किञ्चित् (ii) ................................ अर्जितम्, भरतेन (तु) (iii) ................................ अचिरेण कालेन एव (यशः) (iv) ...............................।

(ख) गच्छन् पिपीलको याति योजनानां शतान्यपि।
अगच्छन् वैनतेयोऽपि पदमेकं न गच्छति।।

**अन्वयः**- पिपीलकः अपि (v) ................................ योजनानां शतानि (vi) ...............................। अगच्छन् वैनतेयः (vii) ................................ पदम् अपि (viii) ................................ गच्छति।

13. रेखांकितानि पदानि आधृत्य प्रश्ननिर्माणं कुरुत- 1×4=4

(i) वयं <u>पर्युषितम्</u> अन्नम् न खादेम।
(ii) नरः <u>अतिथीनां</u> पूजकः स्यात्।
(iii) <u>भागीरथीतीरे</u> पाटलिपुत्रनामधेयं नगरम् आसीत्।
(iv) महान् भवितुम् <u>सत्संगतिः</u> अपेक्षिता।

14. अधोलिखितवाक्यानि कथाक्रमेण संयोज्य लिखत। ½×8=4

(i) बालस्य रक्षायै नियुक्तः नकुलः बालकम् उपसरन्तम् एकं सर्पम् अपश्यत्।

(ii) एकदा राजा श्राद्धार्थम् तं ब्राह्मणम् निमन्त्रितम् अकरोत्।

(iii) श्राद्धकार्यात् प्रतिनिवृत्तः ब्राह्मणः रक्तविलिप्तम् नकुलम् अपश्यत्।

(iv) उज्जयिन्याम् माधवः नाम विप्रः वसति स्म।

(v) गमनात् पूर्वम् ब्राह्मणः स्वपालितम् नकुलम् एकाकिनः बालस्य रक्षार्थम् नियुक्तम् अकरोत्।

(vi) रक्तविलिप्तम् नकुलं दृष्ट्वा ब्राह्मणः "अनेन मे बालकः खादितः" इति मत्वा तम् अमारयत्।

(vii) गृहस्य अन्तः गत्वा, बालकम् स्वस्थम् सर्पम् च हतं दृष्ट्वा सः अतीव दुःखी अभवत्।

(viii) सर्पं मारयन् नकुलः तस्य रक्तेन विलिप्तमुखः जातः।

15. प्रसङ्गानुसारम् रेखाङ्कितपदानां उचितम् अर्थम् चित्वा लिखत- 1×4=4

(i) यदि <u>सत्वरम्</u> न गच्छामि तदा अन्यः कश्चित् श्राद्धार्थं वृतः भवेत्।

(अ) शीघ्रम् (ब) शनैः

(स) सततम् (द) सदैव

(ii) <u>नक्तम्</u> दधि न भुञ्जीत।

(अ) प्रभाते (ब) सायंकाले

(स) मध्याह्ने (द) रात्रौ

(iii) पञ्चेन्द्रियद्रव्याणि <u>खं</u> वायुः ज्योतिः आपो भूः इति।

(अ) इन्द्रियम् (ब) सुखम्

(स) आकाशः (द) 'ख' इति वर्णः

(iv) न <u>दुष्टयानानि</u> आरोहेत्।

(अ) विकृतानि वाहनानि (ब) दुर्जनानाम् वाहनानि

(स) दूषितानि स्थानानि (द) दुष्टैः सह यानानि

## अंक योजना

### खण्डः- (क) अपठित-अवबोधनम् 10 अङ्काः

| प्रश्नसंख्या | | | अपेक्षित-उत्तराणि | अङ्काः |
|---|---|---|---|---|
| 1 | I | (i) | दृष्टिकोणः | ½ |
| | | (ii) | शीतलता | ½ |
| | | (iii) | सुकरातस्य | ½ |
| | | (iv) | यूनानदेशस्य | ½ |
| | II | (i) | भक्त अपृच्छत्-दीपकस्य अधः अन्धकारः चन्द्रमासि च कलङ्कः किमर्थं भवति। | 1 |
| | | (ii) | यदि नरः सकारात्मकदृष्ट्या जीवनं यापयति तदा तस्य सर्वे विकाराः दूरीभवन्ति। | 1 |
| | III | | सुखदु:खयोः मूलकारणम् उचितः दृष्टिकोणः, अथवा किमपि अन्यत्। | 2 |
| | (iv) | (i) | भक्तः | 1×4=4 |
| | | (ii) | अधः | |
| | | (iii) | भक्ताय | |
| | | (iv) | भावना | |

### खण्डः- (ख) 15 अङ्काः

**पत्रलेखनम् ½×10=5**

2.
(i) हरिद्वारतः
(ii) सौरभ
(iii) चित्रवर्णनप्रतियोगितायाः
(iv) संस्कृतभित्तिपत्रिकायाः
(v) प्रदर्शनं
(vi) नाग्नः
(vii) पत्रिकायाः
(viii) आगच्छतु
(ix) अभिवादनम्
(x) अनिल

3. मञ्जूषातः शब्दान् गृहीत्वा छात्रः संस्कृतेन पञ्चवाक्येषु चित्रस्य वर्णनं करिष्यन्ति। 2×5=10

**अथवा**

स्वयं मञ्जूषाप्रदत्तानां पदानां सहायतया 'जलप्रदूषणम्' अधिकृत्य पञ्चवाक्यानि लेखिष्यन्ति। प्रतिवाक्यम् अङ्कद्वयं भविष्यति, एकः अङ्कः तथ्याय, एकः च अङ्कः भाषायाः शुद्धतायै।

## खण्डः (ग) अनुप्रयुक्तव्याकरणम् – 30 अङ्काः

4. (i) घ 1×4=4
   (ii) त्
   (iii) ष्
   (iv) विद्यालयः

5. (i) अध्ययनार्थम् ½×10=5
   (ii) पञ्चेन्द्रियाणि
   (iii) उल्लसिता
   (iv) निर् + रसम्
   (v) प्रति + एकम्
   (vi) महा + ओषधिः
   (vii) वागीशः
   (viii) एतत् + चित्रम्
   (ix) अनयोर्विधेयः
   (x) अनुगृहीतः + अस्मि

6. (i) मुनेः ½×10=5
   (ii) पशूनाम्
   (iii) पत्रिकायाम्
   (iv) पुष्पाणि
   (v) अस्याः
   (vi) रचयितुः
   (vii) अङ्कान्
   (viii) सरस्वत्याः
   (ix) वस्तूनि
   (x) मम

7. (i) सन्ति ½×10=5

(ii) अपठाम

(iii) नेष्यति

(iv) लप्स्यन्ते

(v) याचसे

(vi) अमोदन्त

(vii) सेविष्ये

(viii) अकरोः

(ix) नंस्यन्ति

(x) पचथ

8. (i) वृक्षाणाम् 1×5=5

(ii) उद्यानम्

(iii) बालकस्य

(iv) रक्षाकार्ये

(v) नमः

9.(क) (i) आरुह्य 1×3=3

(ii) खादित्वा

(iii) क्रीडितुम्

(ख) (i) प्र + नम् + ल्यप् 1×3=3

(ii) पा + क्त्वा

(iii) श्रु + तुमुन्

## खण्डः (घ) पठित-अवबोधनम् – 35 अङ्काः

10.(अ) गद्यांशः ½ × 2=1

I (i) वेदान्

(ii) श्वेतकेतुः

II श्वेतकेतुः चतुर्विंशतिवर्षीय भूत्वा पितुः सकाशम् आगच्छत्। 1 × 2=2

III (i) अनधीत्य 1 × 2=2

(ii) वेदान्

(आ) पद्यांशः ½ × 2=1

I (i) सोत्साहानां

(ii) मार्गारब्धाः

II (i) अग्निः मथ्यमानात् काष्ठात् जायते। 2 × 1=2

III (i) सर्वयत्नाः 1× 2=2

(ii) तोयम्

(इ) नाट्यांशः

I (i) भरतः ½ × 2=1

(ii) स्वराज्यम्

II भरतः रामं पादोपभुक्ते पादुके दांतु प्रार्थितवान् 1 × 2=2

III (i) प्रतिग्रहीतुम् 1 × 2=2

(ii) भरताय

11.(क) (i) परिवर्तनशील ½×4=2

(ii) म्रियन्ते

(iii) जन्मना

(iv) सार्थकम्

(ख) (i) श्रेष्ठः ½×4=2

(ii) मूर्खाः

(iii) अन्धकारम्

(iv) अनेकेषाम्

12.(क) (i) सुचिरेण ½×4=2

(ii) यशः

(iii) अद्य

(iv) सञ्चितम्

(ख) (i) गच्छन् ½×4=2

(ii) याति

(iii) एकम्

(iv) गच्छति

13.(क) (i) कीदृशम् 1×4=4

(ii) 'केषाम्'

(iii) कुत्र

(iv) का

14. (iv) उज्जयिन्यां माधवः नाम विप्रः वसति स्म। 1×8=4

(ii) एकदा राजा श्राद्धार्थम् ब्राह्मणं निमन्त्रितम् अकरोत्।

(v) गमनात् पूर्वं ब्राह्मणः स्वपालितं नकुलम् एकाकिनः बालस्य रक्षार्थं नियुक्तम् अकरोत्।

(i) बालस्य रक्षायै नियुक्तः नकुलः बालकम् उपसरन्तम् एकं सर्पम् अपश्यत्।

(viii) सर्पम् मारयन् नकुलः रक्तेन विलिप्तमुखः जातः।

(iii) श्राद्धकार्यात् प्रतिनिवृत्तः ब्राह्मणः रक्तविलिप्तं नकुलम् अपश्यत्।

(vi) रक्तविलिप्तं नकुलं दृष्ट्वा ब्राह्मणः ''अनेन बालकः खादितः'' इति चिन्तयित्वा तम् अमारयत्।

(vii) गृहस्य अन्तः गत्वा बालकं स्वस्थं, सर्पं च हतं दृष्ट्वा अतीव दुःखी अभवत्।

15. (i) शीघ्रम् $1 \times 4 = 4$

(ii) रात्रौ

(iii) आकाशः

(iv) विकृतानि वाहनानि